त्रयोदशः पाठः

# विश्वशान्तिः



[पाठेऽस्मिन् संसारे वर्तमानस्य अशान्तिवातावरणस्य चित्रणं तत्समाधानोपायश्च निरूपितौ । देशेषु आन्तरिकी वाह्या च अशान्तिः वर्तते । तामुपेक्ष्य न कश्चित् स्वजीवनं नेतुं समर्थः । सेयम् अशान्तिः सार्वभौमिकी वर्तते इति दुःखस्य विषयः। सर्वे जनाः तया अशान्त्या चिन्तिताः सन्ति । संसारे तन्निवारणाय प्रयासाः क्रियन्ते ।]

वर्तमाने संसारे प्रायशः सर्वेषु देशेषु उपद्रवः अशान्तिर्वा दृश्यते । क्वचिदेव शान्तं वातावरणं वर्तते । क्वचित् देशस्य आन्तरिकी समस्यामाश्रित्य कलहो वर्तते, तेन शत्रुराज्यानि मोदमानानि कलहं वर्धयन्ति । क्वचित् अनेकेषु राज्येषु परस्परं शीतयुद्धं प्रचलति । वस्तुतः संसारः अशान्तिसागरस्य कूलमध्यासीनो दृश्यते । अशान्तिश्च मानवताविनाशाय कल्पते । अद्य विश्वविध्वंसकान्यस्त्राणि बहून्याविष्कृतानि सन्ति । तैरेव मानवतानाशस्य भयम् ।

अशान्तेः कारणं तस्याः निवारणोपायश्च सावधानतया चिन्तनीयौ । कारणे ज्ञाते निवारणस्य उपायोऽपि ज्ञायते इति नीतिः । वस्तुतः द्वेषः असहिष्णुता च अशान्तेः कारणद्वयम् । एको देशः अपरस्य उत्कर्षं दृष्ट्वा द्वेष्टि, तस्य देशस्य उत्कर्षनाशाय निरन्तरं प्रयतते । द्वेषः एव असहिष्णुतां

जनयति । इमौ दोषौ परस्परं वैरमुत्पादयतः । स्वार्थश्च वैरं प्रवर्धयति । स्वार्थप्रेरितो जनः अहंभावेन परस्य धर्मं जातिं सम्पत्तिं क्षेत्रं भाषां वा न सहते । आत्मन एव सर्वमुत्कृष्टमिति मन्यते। राजनीतिज्ञाश्च अत्र विशेषेण प्रेरकाः । सामान्यो जनः न तथा विश्वसन्नपि बलेन प्रेरितो जायते । स्वार्थोपदेशः बलपूर्वकं निवारणीयः। परोपकारं प्रति यदि प्रवृत्तिः उत्पाद्यते तदा सर्वे स्वार्थं त्यजेयुः । अत्र महापुरुषाः विद्वांसः चिन्तकाश्च न विरलाः सन्ति । तेषां कर्तव्यमिदं यत् जने-जने, समाजे-समाजे, राज्ये-राज्ये च परमार्थ वृत्तिं जनयेयुः ।

शुष्कः उपदेशश्च न पर्याप्तः, प्रत्युत तस्य कार्यान्वयनञ्च जीवनेऽनिवार्यम् । उक्तञ्च – ज्ञानं भारः क्रियां विना। देशानां मध्ये च विवादान् शमयितुमेव संयुक्तराष्ट्रसंघप्रभृतयः संस्थाः सन्ति । ताश्च काले-काले आशङ्कितमपि विश्वयुद्धं निवारयन्ति । भगवान् बुद्धः पुराकाले एव वैरेण वैरस्य शमनम् असम्भवं प्रोक्तवान् । अवैरेण करुणया मैत्रीभावेन च वैरस्य शान्तिः भवतीति सर्वे मन्यन्ते । भारतीयाः नीतिकाराः सत्यमेव उद्घोषयन्ति –

**अयं निजः परो वेति गणना लघुचेतसाम् ।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ।।**

परपीडनम् आत्मनाशाय जायते, परोपकारश्च शान्तिकारणं भवति । अद्यापि परस्य देशस्य संकटकाले अन्ये देशाः सहायताराशिं सामग्रीं च प्रेषयन्ति इति विश्वशान्तेः सूर्योदयो दृश्यते ।

### शब्दार्थाः

| | | |
|---|---|---|
| वा | अथवा | अथवा |
| आश्रित्य | अवलम्ब्य | सहारा लेकर |
| मोदमानानि | प्रसन्नानि | आनन्दित |
| कलहम् | विवादम् | झगड़ा |
| वर्धयन्ति | | बढ़ाते हैं |
| शीतयुद्धम् | प्रच्छन्नयुद्धं | शीतयुद्ध (Cold war) |
| कूलम् | तटम् | किनारा |
| विध्वंसकानि | नाशकानि | नष्ट करने वाले |

| | | |
|---|---|---|
| निवारणम् – | दूरीकरणम् – | दूर करना (हटाना) |
| असहिष्णुता – | परस्य उत्कर्षं प्रति ईर्ष्या – | दूसरे की उन्नति न सहना |
| विरला: – | अल्पा: – | बहुत कम |
| प्रत्युत – | अपितु – | बल्कि |
| शमयितुम् – | शान्तं कर्तुम् – | शान्त करने के लिए |
| प्रभृतय: – | इत्यादय: – | इत्यादि |
| पुराकाले – | प्राचीनकाले – | पुराने समय में |
| करुणया – | दयया – | दया से |
| लघुचेतसाम् – | क्षुद्रचित्तानाम् – | छोटे चित्त वालों का |
| निज: – | स्वकीय: – | अपना |
| वसुधा – | पृथ्वी – | धरती |
| निरन्तरम् – | सततम् – | हमेशा (लगातार) |
| अध्यासीन: – | स्थित: – | विराजमान |

**सन्धिविच्छेद:**

| | | |
|---|---|---|
| अशान्तिर्वा | = | अशान्ति: + वा |
| क्वचिदेव | = | क्वचित् + एव |
| अशान्तिश्च | = | अशान्ति: + च |
| विश्वविध्वंसकान्यस्त्राणि | = | विश्वविध्वंसकानि + अस्त्राणि |
| बहून्याविष्कृतानि | = | बहूनि + आविष्कृतानि |
| तैरेव | = | तै: + एव |
| निवारणोपायश्च | = | निवारण + उपाय: + च |
| उपायोऽपि | = | उपाय: + अपि |
| स्वार्थश्च | = | स्व + अर्थ: + च |

| | | |
|---|---|---|
| विश्वसन्नपि | = | विश्वसन् + अपि |
| परोपकारम् | = | पर + उपकारम् |
| कार्यान्वयनञ्च | = | कार्यान्वयनम् + च |
| जीवनेऽनिवार्यम् | = | जीवने + अनिवार्यम् |
| क्तञ्च | = | उक्तम् + च |
| भवतीति | = | भवति + इति |
| वेति | = | वा + इति |
| वसुधैव | = | वसुधा + एव |
| अद्यापि | = | अद्य + अपि |
| परोपकारश्च | = | पर + उपकारः +च |

## समासः

| | | |
|---|---|---|
| अशान्तिः | – | न शान्तिः (नञ् समासः) |
| महापुरुषः | – | महान् चासौ पुरुषः (कर्मधारयः) |
| शत्रुराज्यानि | – | शत्रोः राज्यानि (षष्ठी तत्पुरुषः) |
| अशान्तिसागरः | – | अशान्तेः सागरः (षष्ठी तत्पुरुषः) |
| शीतयुद्धम् | – | शीतं (प्रच्छन्नं) च तद् युद्धम् (कर्मधारयः) |
| स्वार्थोपदेशः | – | स्वार्थस्य उपदेशः (षष्ठी तत्पुरुषः) |
| परोपकारः | – | परस्य उपकारः (षष्ठी तत्पुरुषः) |
| विश्वशान्तिः | – | विश्वस्य शान्तिः (षष्ठी तत्पुरुषः) |
| असम्भवम् | – | न सम्भवम् (नञ् समासः) |
| स्वार्थप्रेरितः | – | स्वार्थेन प्रेरित : (तृतीया तत्पुरुषः) |
| सूर्योदयः | – | सूर्यस्य उदयः (षष्ठी तत्पुरुषः) |
| परपीडनम् | – | परस्य पीडनम् (षष्ठी तत्पुरुषः) |

मानवताविनाशाय - मानवतायाः विनाशः, तस्मै (षष्ठी तत्पुरुषः)

बलपूर्वकम् - बलं पूर्वं यस्य तथाभूतम् - बहुव्रीहिः (क्रियाविशेषण)

**प्रकृतिप्रत्ययविभागः**

| | | |
|---|---|---|
| आश्रित्य | = | आ + श्रि + ल्यप् |
| दृष्ट्वा | = | दृश् + त्वा |
| उत्कृष्टम् | = | उत् + कृष् + क्त |
| उक्तम् | = | वच् + क्त |
| शमयितुम् | = | शम + णिच् + तुमुन् |
| शमनम् | = | शम् + ल्युट् |
| नीतिः | = | नी + क्तिन् |
| शान्तिः | = | शम् + क्तिन् |
| उत्कर्षः | = | उत् + कृष् + घञ् |
| भयम् | = | भी + अच् |
| प्रेरितः | = | प्र + ईर् + क्त |
| भारः | = | भृ + घञ् |

## अभ्यासः

## (मौखिकः)

**1. एकपदेन उत्तरं वदत –**

(क) शत्रुराज्यानि किं वर्धयन्ति ?

(ख) अनेकेषु राज्येषु परस्परं किं प्रचलति ?

(ग) सर्वे किं त्यजेयुः ?

(घ) वैरेण कस्य शमनम् असम्भवम् ?

(ङ) क्रियां विना किं भारः ?

2. निम्नलिखितानां पदानां प्रकृतिप्रत्ययविभागं वदत –

नीतिः , उक्तम् , दृष्ट्वा , गमनम् , आश्रित्य

## अभ्यासः
## ( लिखितः )

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत –

(क) अशान्तिसागरस्य कूलमध्यासीनः कः दृश्यते ?

(ख) अद्य विध्वंसकानि कानि आविष्कृतानि सन्ति ?

(ग) अशान्तेः कारणद्वयं किम् अस्ति ?

(घ) असहिष्णुतां कः जनयति ?

(ङ) कः बलपूर्वकं निवारणीयः ?

2. अधोलिखितपदानां स्ववाक्येषु संस्कृते प्रयोगं कुरुत –

अयम् , अशान्तिः , मैत्री , उत्कर्षम् , प्रेरकः , परोपकारः ।

3. सन्धिविच्छेदं कुरुत –

परोपकारः, निवारणोपायश्च, विश्वसन्नपि, उक्तञ्च, भवतीति, वसुधैव, जीवनेऽनिवार्यम् ।

4. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत –

(क) कारणे ज्ञाते निवारणस्य उपायोऽपि ज्ञायते ।

(ख) सर्वेषु देशेषु अशान्तिः दृश्यते ।

(ग) स्वार्थः वैरं प्रवर्धयति ।

(घ) राजनीतिज्ञाः अत्र विशेषेण प्रेरकाः ।

(ङ) सामान्यो जनः न तथा विश्वसन्नपि बलेन प्रेरितो जायते ।

5. अधोलिखितानां पदानां प्रकृतिप्रत्ययविभागं कुरुत –

उक्तम् , नीतिः , भारः , शमनम् , शान्तिः , आश्रित्य

6. अधोलिखितपदेषु मूलशब्दं विभक्तिं वचनं च लिखत –

अशान्तेः , बलेन , महापुरुषाः , वैरस्य , दोषौ , अपरस्य , संकटकाले ।

7. अधोलिखितानि वाक्यानि बहुवचने परिवर्तयत –

उदाहरणम् – एकवचने – महापुरुषः अस्ति ।

बहुवचने – महापुरुषाः सन्ति ।

(क) विद्वान् कथयति ।

(ख) जनः जानाति ।

(ग) भारतीयः नीतिकारः उद्घोषयति ।

(घ) देशः प्रेषयति ।

(ङ) सः उत्कृष्टं मन्यते ।

(च) त्वं कुत्र गच्छसि ?

8. स्तम्भद्वये लिखितानां विपरीतार्थकशब्दानां मेलनं कुरुत –

| क | | ख |
|---|---|---|
| स्वार्थः | – | विशेषः |
| बलम् | – | परमार्थः |
| सामान्यः | – | अपकर्षः |
| उत्कर्षः | – | निर्बलम् |
| द्वेषः | – | उष्णम् |
| शीतम् | – | निर्माणम् |
| विध्वंसम् | – | मित्रता |

9. **कोष्ठान्तर्गतानां शब्दानां साहाय्येन रिक्तस्थानानि पूरयत -**

(क्वचिदपि , वैरस्य , विरलाः, सावधानतया, पर्याप्तः)

(क) अशान्तेः कारणं तस्याः निवारणोपायश्च .................... चिन्तनीयौ ।

(ख) अवैरेण करुणया मैत्रीभावेन च .................... शान्तिः भवति ।

(ग) अत्र महापुरुषाः .................... सन्ति ।

(घ) शुष्कः उपदेशः न .................... ।

(ङ) .................... शान्तं वातावरणं वर्तते ।

## योग्यताविस्तारः

पठितपाठेन विश्वशान्तये जनजागरणं कर्त्तुं प्रयासः कृतः । अस्य पाठस्य सन्देशः अयमेव अस्ति यत् शान्त्या एव विश्वकल्याणं भवेत् । किन्तु नानाकारणैः सम्प्रति संसारे अशान्तिः अनुभूयते। द्वेषः असहिष्णुता , अविश्वासः , असंतोषः , स्वार्थः चादयः दुर्गुणाः प्रवृद्धाः सन्ति । ततः कुतः शान्तिः ? शान्तिः भारतीयदर्शनस्य मूलतत्त्वमस्ति । इयं शान्तिः धर्ममूला चास्ति । "धर्मो रक्षति रक्षितः" इति प्राचीनः सन्देशः विश्वस्य अस्तित्व - रक्षणाय प्रेरयति । धर्मस्य दश लक्षणानि सन्ति – धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥

## क्रियानुशीलनम् :

**आगच्छन्तु ! वयं सर्वे शिक्षकाः छात्राश्च**
**समये - समये किमपि किमपि कुर्याम !**

(क) इतिहासशिक्षकस्य सहयोगेन प्रथमविश्वयुद्धस्य द्वितीयविश्वयुद्धस्य च पृष्ठभूमिं जानीयाम, तयोः दुष्परिणामान् अवगच्छाम ।

(ख) आधुनिकसमये विविधस्तरेषु अशान्तेः यद् वातावरणं निर्मीयमाणं दृश्यते, तस्य कारणानि परिस्थितिञ्च अवगच्छाम ।

(ग) अस्माभिः समाजस्तरे जातिभेदस्य, सम्प्रदायभेदस्य, धर्मभेदस्य, वर्गभेदस्य, क्षेत्रभेदस्य च आधारेण जायमानानाम् अशान्तिकारणानां निराकरणाय प्रेरकाः कार्यक्रमाः आयोजनीयाः ।

□